294.5
VS Ram
50487

THE LIBRARY

S. N. D. T.
WOMEN'S UNIVERSITY
BOMBAY.

S. N. D. T. WOMEN'S UNIVERSITY
LIBRARY

24 APR 1972

श्रीगणेशायनमः॥ ॥अस्य॥ रामरक्षास्तोत्रमंत्रस्य
बुधकौशिक ऋषिः॥ श्रीसीतारामचंद्रो देवता॥ अनुष्टु
प् छंदः॥सीताशक्तिः॥श्रीमद्धनूमान् कीलकम्॥श्रीराम
चंद्रप्रीत्यर्थे रामरक्षास्तोत्रजपे विनियोगः॥ ॥अथ
ध्यानम्॥ ॥ध्यायेदाजानुबाहुं धृतशरधनुषं बद्धपद्मा
सनस्थं पीतं वासो वसानं नवकमलदलस्पर्धिनेत्रं प्रस
न्नम्॥ वामांकारूढसीतामुखकमलमिलल्लोचनं नीर
दाभं नानाऽलंकारदीप्तं दधतमुरजटामंडनं रामचंद्रम्
॥१॥॥इतिध्यानम्॥ ॥चरितं रघुनाथस्य शतकोटि
प्रविस्तरम्॥ एकैकमक्षरं पुंसां महापातकनाशनम्॥१
ध्यात्वा नीलोत्पलश्यामं रामं राजीवलोचनम्॥जानकी

24 APR 1972
50487

रा॰र॰ लक्ष्मणोपेतं जटामुकुटमंडितम् ॥ २ ॥ सासितूणधनु स्तो॰
१ र्बाणपाणिं नक्तंचरांतकम् ॥ स्वलीलया जगत्रातुमावि
र्भूतमजं विभुम् ३ रामरक्षां पठेत्प्राज्ञः पापघ्नीं सर्वका
मदाम् ॥ शिरो मे राघवः पातु भालं दशरथात्मजः ॥ ४
कौसल्येयो दृशौ पातु विश्वामित्रप्रियः श्रुती ॥ घ्राणं पा
तु मखत्राता मुखं सौमित्रवत्सलः ५ जिह्वां विद्यानिधिः
पातु कंठं भरतवंदितः ॥ स्कंधौ दिव्यायुधः पातु भुजौ भ
ग्नेशकार्मुकः ॥ ६ ॥ करौ सीतापतिः पातु हृदयं जामद-
ग्न्यजित् ॥ मध्यं पातु खरध्वंसी नाभिं जांबवदाश्रयः ॥
७ ॥ सुग्रीवेशः कटिं पातु सक्थि[illegible]मत्प्रभुः ॥ ऊरू १
रघूत्तमः पातु रक्षःकुलविना[illegible] ॥ ८ ॥ जानुनी से

तुरूत्पातु जंघे दशमुखांतकः ॥ पादौ बिभीषणश्रीदः
पातु रामोऽखिलं वपुः ॥ ९ ॥ एतां रामबलोपेतां रक्षां-
यः सुकृती पठेत् ॥ स चिरायुः सुखी पुत्री विजयी वि-
नयी भवेत् ॥ १० ॥ पातालभूतलव्योमचारिणश्छद्म
चारिणः ॥ न द्रष्टुमपि शक्तास्ते रक्षितं रामनामभिः ॥
११ ॥ रामेति रामभद्रेति रामचंद्रेति वा स्मरन् ॥ नरो न
लिप्यते पापैर्भुक्तिं मुक्तिं च विंदति ॥ १२ ॥ जगज्जैत्रै
कमंत्रेण रामनाम्नाऽभिरक्षितम् ॥ यः कंठे धारयेत्त
स्य करस्थाः सर्वसिद्धयः ॥ १३ ॥ वज्रपंजरनामेदं यो
रामकवचं स्मरेत् ॥ अव्याहताज्ञः सर्वत्र लभते जयमं
गलम् ॥ १४ ॥ आदिष्टवान्यथा स्वप्ने रामरक्षामिमां

हरः ॥ तथा लिखितवान्प्रातः प्रबुद्धो बुधकौशिकः
॥१५॥ आरामः कल्पवृक्षाणां विरामः सकलापदा-
म् ॥ अभिरामस्त्रिलोकानां रामः श्रीमान्स नः प्रभुः
॥१६॥ तरुणौ रूपसंपन्नौ सुकुमारौ महाबलौ ॥ पुं-
डरीकविशालाक्षौ चीरकृष्णाजिनांबरौ ॥१७॥ फल
मूलाशिनौ दांतौ तापसौ ब्रह्मचारिणौ ॥ पुत्रौ दशरथ
स्यैतौ भ्रातरौ रामलक्ष्मणौ ॥१८॥ शरण्यौ सर्वसत्त्वा-
नां श्रेष्ठौ सर्वधनुष्मताम् ॥ रक्षःकुलनिहंतारौ त्राये
तां नो रघूत्तमौ ॥१९॥ आत्तसज्जधनुषाविषुस्पृशाव-
क्षयाशुगनिषंगसंगिनौ ॥ रक्षणाय मम रामलक्ष्म-
णावग्रतः पथि सदैव गच्छताम् ॥२०॥ सन्नद्धः क

वची खड्गी चापबाणधरो युवा ॥ गच्छन्मनोऽरथोऽ
स्माकं रामः पातु सलक्ष्मणः ॥ २१ ॥ रामो दाशरथिः
शूरो लक्ष्मणानुचरो बली ॥ काकुत्स्थः पुरुषः पूर्णः
कौसल्येयो रघूत्तमः ॥ २२ ॥ वेदांतवेद्यो यज्ञेशः पुरा
णपुरुषोत्तमः ॥ जानकीवल्लभः श्रीमानप्रमेयपराक्र
मः ॥ २३ ॥ इत्येतानि जपेन्नित्यं मद्भक्तः श्रद्धयाऽन्वि
तः ॥ अश्वमेधाधिकं पुण्यं संप्राप्नोति न संशयः ॥ २४
रामं दूर्वादलश्यामं पद्माक्षं पीतवाससम् ॥ स्तुवंति
नामभिर्दिव्यैर्न ते संसारिणो नराः ॥ २५ ॥ रामं ल-
क्ष्मणपूर्वजं रघुवरं सीतापतिं सुंदरं काकुत्स्थं करु-
णार्णवं गुणनिधिं विप्रप्रियं धार्मिकम् ॥ राजेंद्रं स-

रा.र.
३

त्यसंधं दशरथतनयं श्यामलं शांतमूर्तिं वंदे लोका
भिरामं रघुकुलतिलकं राघवं रावणारिम् ॥२६॥ रा
माय रामभद्राय रामचंद्राय वेधसे ॥ रघुनाथाय
नाथाय सीतायाः पतये नमः ॥२७॥ श्रीराम राम र-
घुनंदन राम राम श्रीराम राम भरताग्रज राम राम ॥
श्रीराम राम रणकर्कश राम राम श्रीराम राम शरणं
भव राम राम ॥२८॥ श्रीरामचंद्रचरणौ मनसा स्मरा
मि श्रीरामचंद्रचरणौ वचसा गृणामि ॥ श्रीरामचंद्रच
रणौ शिरसा नमामि श्रीरामचंद्रचरणौ शरणं प्रपद्ये
॥ माता रामो मत्पिता रामचंद्रः स्वामी रामो मत्सखा
रामचंद्रः ॥ सर्वस्वं मे रामचंद्रो दयालुर्नान्यं जाने नैव

जाने न जाने ॥ ३० ॥ दक्षिणे लक्ष्मणो यस्य वामे तु ज
नकात्मजा ॥ पुरतो मारुतिर्यस्य तं वंदे रघुनंदनम् ॥
३१ ॥ लोकाभिरामं रणरंगधीरं राजीवनेत्रं रघुवंश
नाथम् ॥ कारुण्यरूपं करुणाकरं तं श्रीरामचंद्रं शर
णं प्रपद्ये ॥ ३२ ॥ मनोजवं मारुततुल्यवेगं जितेंद्रि
यं बुद्धिमतां वरिष्ठम् ॥ वातात्मजं वानरयूथमुख्यं
श्रीरामदूतं शरणं प्रपद्ये ॥ ३३ ॥ कूजंतं राम रामेति
मधुरं मधुराक्षरम् ॥ आरुह्य कविता शाखां वंदे वा
ल्मीकिकोकिलम् ॥ ३४ ॥ आपदामपहर्तारं दातारं
सर्व संपदाम् ॥ लोकाभिरामं श्रीरामं भूयो भूयो-
न माम्यहम् ॥ ३५ ॥ भर्जनं भवबीजानामार्जनं सु

रवसंपदाम् ॥ तर्जनं यमदूतानां रामरामेति गर्जनम्
॥३६॥ रामो राजमणिः सदाविजयते रामं रमेशं भ
जे रामेणाभिहता निशाचरचमू रामाय तस्मै नमः॥
रामान्नास्ति परायणं परतरं रामस्य दासोऽस्म्यहं-
रामे चित्तलयः सदाभवतु मे भो राम मामुद्धर ३७
राम रामेति रामेति रमे रामे मनोरमे॥ सहस्रनाम
तत्तुल्यं रामनाम वरानने॥ ३८॥ ॥ इति श्रीबुध-
कौशिकविरचितं श्रीरामरक्षास्तोत्रं संपूर्णम् ॥ ॥
॥ श्रीसीतारामचंद्रार्पणमस्तु ॥ ॥ ७॥ ॥

## ॥अथ मारुतिस्तोत्र प्रारंभः॥

श्रीगणेशायनमः॥ ॥ अद्यपूर्वोच्चारित वर्तमान ए
वंगुण विशेषण विशिष्टायां शुभपुण्य तिथौ मम अ
भीप्सित कामना सिद्ध्यर्थं मारुतीस्तोत्र जपमहं क-
रिष्ये॥ ॥अथध्यानम्॥ ॥मनोजवंमारुततुल्यवेगं
जितेंद्रियंबुद्धिमतांवरिष्ठं॥वातात्मजंवानरयूथमु
ख्यं श्रीरामदूतंशरणंप्रपद्ये॥१॥ ॥इतिध्यानम्॥
मानसोपचारैः संपूज्य॥ ॥भीमरूपीमहारुद्रा व
ज्रहनुमान मारुती॥ वनारी अंजनीसूता रामदू-
ता प्रभंजना॥१॥ महाबळी प्राणदाता सकळांउ-

ठवी बळें ॥ सौख्यकारी दुःखहारी दूत वैष्णव गाय
का ॥ २ ॥ दीनानाथा हरीरूपा सुंदरा जगदांतरा ॥
पाताळदेवताहंता भव्यसिंदूरलेपना ॥ ३ ॥ लोक
नाथा जगन्नाथा प्राणनाथा पुरातना ॥ पुण्यवंता
पुण्यशीला पावना परितोषका ॥ ४ ॥ ध्वजाग्रीं उच
ली बाहू आवेशें लोटला पुढें ॥ काळाग्नि काळरुद्रा
ग्नी देखतां कांपती भयें ॥ ५ ॥ ब्रह्मांड माइलें नेणों-
आवाळें दंतपंगती ॥ नेत्राग्नी चालिल्या ज्वाळा भ्रु-
कुटी ताठिल्या बळें ॥ ६ ॥ पुच्छ तें मुरडिलें माथां कि
रीटी कुंडलें बरीं ॥ सुवर्णकटिकांसोटी घंटा किंकि-
णि नागरा ॥ ७ ॥ ठकारे पर्वता ऐसा नेटका सडपातळू

॥ चपळांगपाहतां मोठ महाविघ्न ह्मुतेपरी ॥ ८ ॥ कोटी
चकोटिउड्डाणें झेंपावेउत्तरेकडे ॥ मंद्राद्रिसारिखाद्रो-
णक्रोधेंउत्पाटिलाबळें ॥ ९ ॥ आणिलामागुतीनेला-
गेलाआलामनोगती ॥ मनासिटाकिलेंमागेंगतीसी-
तुळनानसे ॥ १० ॥ अणुपासोनिब्रह्मांडयेवढाहोतजा
तसे ॥ तयासितुळनाकैंचीमेरुमंदारधाकुटे ॥ ११ ॥-
ब्रह्मांडाभोंवतेवेढेवज्रपुच्छें चढेंतसे ॥ तयासिउ
पमाद्यायाब्रह्मांडींपाहतांनसे ॥ १२ ॥ आरक्तपाह-
तांडोळांग्रासिलेंसूर्यमंडळ ॥ भूतप्रेतसमंधादी रो-
गव्याधिसमस्तहि ॥ १३ ॥ धनधान्यपशूवृद्धीपुत्रपौ
त्रसमस्तहि ॥ पावतीरूपविद्यादिस्तोत्रपाठेंकरूनि

50487

यां ॥१४॥ ऐसें हें स्तोत्र माहात्म्य पढती जपती स-
दां ॥ मारुतीचे प्रसादानें भक्ति मुक्ति सदां वसे ॥१५
॥ नासती तूटती चिंता आनंदें भीमदर्शनें ॥ हीध-
रा पंधरा श्लोकी लाधली शोभली बरी ॥१६॥ दृढ-
देही नसंदेही संख्या चंद्रकळा गुणें ॥ रामदासी अग्र
गण्य कपिकुळासि मंडण ॥१७॥ रामरूपी अंतरा-
त्मा दर्शनें दोष नासती ॥१८॥ ॥ इति श्री रामदास
कृत संकष्ट नाशन मारुतिस्तोत्रं संपूर्णम् ॥ ॥छ॥

VS 294.5 R 50487
Ram

AUTHOR Ramaraksha va
TITLE Maruti stotre.

DATE DUE | BORROWER'S NAME

VS 294.5
Ram
50487

Date Due